गजेंद्र मोक्षः

गजेंद्र मोक्षः

श्री शुक उवाच –
आसीद्गिरिवरो राजन् त्रिकूट इति विश्रुतः |
क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः || 1 ||

तावता विस्तृतः पर्यक्त्रिभिः शृंगैः पयोनिधिं |
दिशश्च रोचयन्नास्ते रौप्यायसहिरण्मयैः || 2 ||

अन्यैश्च ककुभः सर्वा रत्नधातु विचित्रितैः |
नानाद्रुमलतागुल्मैः निर्घोषैः निर्झरांभसां || 3 ||

सदानिमज्यमानांघ्रिः समंतात्पय ऊर्मिभिः |
करोति श्यामलां भूमिं हरिन्मरकताश्मभिः || 4 ||

सिद्धचारणगंधर्वैर्विद्याधर महोरगैः |
किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः || 5 ||

यत्र संगीतसन्नादैर्नदद्गुहममर्षया |
अभिगर्जंति हरयः श्लाघिनः परशंकया || 6 ||

नानारण्यपशुव्रात संकुलद्रोण्यलंकृतः |
चित्रद्रुमसुरोद्यान कलकंठ विहंगमः || 7 ||

सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः |
देवस्त्रिमज्जनामोद सौरभांब्वनिलैर्युतः || 8 ||

तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः |
उद्यानमृतुमन्नाम ह्याक्रीडं सुरयोषितां || 9 ||

सर्वतोऽलंकृतं दिव्यैर्नित्यपुष्पफलद्रुमैः |
मंदारैः पारिजातैश्च पाटलाशोकचंपकैः || 10 ||

चूतैः प्रियाळैः पनसैराम्रैराम्रातकैरपि |
क्रमुकैर्नारिकेळैश्च खर्जूरैर्बीजपूरकैः || 11 ||

मधूकैस्तालसालैश्च तमालै रसनार्जुनैः |
अरिष्टोदुंबरप्लक्षैर्वटैः किंशुकचंदनैः || 12 ||

पिचुमंदैः कोविदारैः सरळैः सुरदारुभिः |
द्राक्षेक्षु रंभाजंबूभिर्बदर्यक्षाभयामलैः || 13 ||

बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकैरपि |
तस्मिन्सरः सुविपुलं लसत्कांचनपंकजं || 14 ||

कुमुदोत्पलकल्हार शतपत्रश्रियोर्जितं |
मत्तषट्पद निर्घुष्टं शकुंतैः कलनिस्वनैः || 15 ||

हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि |
जलकुक्कुटकोयष्टि दात्यूहकलकूजितं || 16 ||

मत्स्यकच्छपसंचार चलत्पद्मरजःपयः |
कदंबवेतसनल नीपवंजुलकैर्वृतं || 17 ||

कुंदैः कुरवकाशोकैः शिरीषैः कूटजेंगुदैः |
कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः || 18 ||

मल्लिकाशतपत्रैश्च माधवीजालकादिभिः |
शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः || 19 ||

तत्रैकदा तद्गिरिकाननाश्रयः
करेणुभिर्वारणयूथपश्चरन् |
सकंटकं कीचकवेणुवेत्रव-
-द्विशालगुल्मं प्ररुजन्वनस्पतीन् || 20 ||

यद्गंधमात्राद्धरयो गजेंद्रा
व्याघ्रादयो व्यालमृगाश्च खड्गाः |
महोरगाश्चापि भयाद्द्रवंति
सगौरकृष्णाः सरभाश्चमर्यः || 21 ||

वृका वराहा महिषर्क्षशल्या
गोपुच्छसालावृकमर्कटाश्च |
अन्यत्र क्षुद्रा हरिणाः शशादयः
चरंत्यभीता यदनुग्रहेण || 22 ||

स घर्मतप्तः करिभिः करेणुभि-
-र्वृतो मदच्युत्कलभैरभिद्रुतः |
गिरिं गरिम्णा परितः प्रकंपयन्
निषेव्यमाणोऽलिकुलैर्मदाशनैः || 23 ||

सरोऽनिलं पंकजरेणुरूषितं
जिघ्रन् विदूरान् मदविह्वलेक्षणः |
वृतः स्वयूथेन तृषार्दितेन त-
-त्सरोवराभ्याशमथागमद्द्रुतं || 24 ||

विगाह्य तस्मिन् अमृतांबु निर्मलं
हेमारविंदोत्पलरेणुवासितं |
पपौ निकामं निजपुष्करोद्धृतं
स्वात्मानमद्भिः स्नपयन्गतक्लमः || 25 ||

स पुष्करेणोद्धृतशीकरांबुभि-
-र्निपाययन् संस्नपयन् यथा गृही |
जिघ्रन् करेणुः कलभाश्च दुर्मना
ह्याचष्ट कृच्छ्रं कृपणोऽजमायया || 26 ||

तं तत्र कश्चिन्नृप दैवचोदितो
ग्राहो बलीयांश्चरणौ रुषाऽग्रहीत् |
यदृच्छयैवं व्यसनं गतो गजो
यथाबलं सोऽतिबलो विचक्रमे || 27 ||

तथाऽऽतुरं यूथपतिं करेणवो
विकृष्यमाणं तरसा बलीयसा |
विचुक्रुशुर्दीनधियोऽपरे गजाः
पार्ष्णिग्रहास्तारयितुं न चाशकन् || 28 ||

नियुध्यतोरेवमिभेंद्रनक्रयो-
-र्विकर्षतोरंतरतो बहिर्मिथः |
समाः सहस्रं व्यगमन् महीपते
सप्राणयोश्चित्रममंसतामराः || 29 ||

ततो गजेंद्रस्य मनोबलौजसां
कालेन दीर्घेण महानभूद्व्ययः |
विकृष्यमाणस्य जलेऽवसीदतो
विपर्ययोऽभूत्सकलं जलौकसः || 30 ||

इत्थं गजेंद्रः स यदाऽऽप संकटं
प्राणस्य देही विवशो यदृच्छया |
अपारयन्नात्मविमोक्षणे चिरं
दध्याविमां बुद्धिमथाभ्यपद्यत || 31 ||

नमामि मे ज्ञातय आतुरं गजाः
कुतः करिण्यः प्रभवंति मोक्षितुं |
ग्राहेण पाशेन विधातुरावृतो
ह्यहं च तं यामि परं परायणं || 32 ||

यः कश्चनेशो बलिनोऽंतकोरगा-
-त्प्रचंडवेगादभिधावतो भृशं |
भीतं प्रपन्नं परिपाति यद्भया-
-न्मृत्युः प्रधावत्यरणं तमीमहे || 33 ||

इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे द्वितीयोऽध्यायः || 2 ||